# Shri Haryashtakam

# શ્રીહર્યષ્ટકમ્

## Document Information

Text title : haryaShTakam

File name : haryaShTakam.itx

Category : vishhnu, aShTaka, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : From Vishnu Stuthi Manjari 3, From stotrArNavaH 03-15

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીહર્યષ્ટકમ્

પ્રહ્લાદકૃતમ્ ।
હરિર્હરતિ પાપાનિ દુષ્ટચિત્તૈરપિ સ્મૃતઃ ।
અનિચ્છયાઽપિ સંસ્પૃષ્ટો દહત્યેવ હિ પાવકઃ ॥ ૧॥

સ ગઙ્ગા સ ગયા સેતુઃ સ કાશી સ ચ પુષ્કરમ્ ।
જિહ્વાગ્રે વર્તતે યસ્ય હરિરિત્યક્ષરદ્વયમ્ ॥ ૨॥

વારાણસ્યાં કુરુક્ષેત્રે નૈમિશારણ્ય એવ ચ ।
યત્કૃતં તેન યેનોક્તં હરિરિત્યક્ષરદ્વયમ્ ॥ ૩॥

પૃથિવ્યાં યાનિ તીર્થાનિ પુણ્યાન્યાયતનાનિ ચ ।
તાનિ સર્વાણ્યશેષાણિ હરિરિત્યક્ષરદ્વયમ્ ॥ ૪॥

ગવાં કોટિસહસ્રાણિ હેમકન્યાસહસ્રકમ્ ।
દત્તં સ્યાત્તેન યેનોક્તં હરિરિત્યક્ષરદ્વયમ્ ॥ ૫॥

ઋગ્વેદોઽથ યજુર્વેદઃ સામવેદોઽપ્યથર્વણઃ ।
અધીતસ્તેન યેનોક્તં હરિરિત્યક્ષરદ્વયમ્ ॥ ૬॥

અશ્વમેધૈર્મહાયજ્ઞૈર્નરમેધૈસ્તથૈવ ચ ।
ઇષ્ટં સ્યાત્તેન યેનોક્તં હરિરિત્યક્ષરદ્વયમ્ ॥ ૭॥

પ્રાણઃ પ્રયાણપાથેયં સંસારવ્યાધિનાશનમ્ ।
દુઃખાત્યન્તપરિત્રાણં હરિરિત્યક્ષરદ્વયમ્ ॥ ૮॥

બદ્ધઃ પરિકરસ્તેન મોક્ષાય ગમનં પ્રતિ ।
સકૃદુચ્ચારિતં યેન હરિરિત્યક્ષરદ્વયમ્ ॥ ૯॥

હર્યષ્ટકમિદં પુણ્યં પ્રાતરુત્થાય યઃ પઠેત્ ।
આયુષ્યં બલમારોગ્યં યશો વૃદ્ધિશ્શ્રિયાવહમ્ ॥ ૧૦॥

પ્રહ્લાદેન કૃતં સ્તોત્રં દુઃખસાગરશોષણમ્ ।

યઃ પઠેત્સ નરો યાતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૧૧॥

ઇતિ પ્રહ્લાદકૃતં શ્રીહર્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Haryashtakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*